# महाकविः कालिदासः

## कालिदासस्य समयः

भारतीयकवीनां समयनिर्धारणमतिकष्टसाध्यं कार्यम्, यतस्तैः स्वविषये किमपि न लिखितम्। अस्यां स्थितौ अन्यकृतैरुल्लेखैः अनुमानेन च प्राचां कवीनां समयो व्यवस्थापनीयो भवति। अस्मादेव हेतोः कालिदासस्य समय-सम्बन्धेऽपि मतभेदा वर्त्तन्ते—

Scanned with CamScanner

१. सर विलियम् जोन्स-महोदयः विक्रमसंवत्प्रवर्त्तकस्य ईसवी पूर्ववर्त्तिनः कस्यापि विक्रमादित्यस्य राज्ञः कल्पनां कृत्वा तत्सभामण्डनं दासं मत्वा ई० पू० प्रथमशताब्दीसमुद्भववत्वं कालिदासस्य मन्यते।

२ डा० वेबर लौसन, याकोबि, मॉनियर विलियम, महानुभावानां तिषु ई० द्वितीयशतकयोर्मध्यकालिकत्वं कालिदासस्य स्वीक्रियते।

३. डा० भाऊदाजी महाशयस्तु—उज्जयिनीनरेशा हर्षविक्रमा मातृगुप्तनामानं काश्मीरान् शासितुं प्रेषितवान् स मातृगुप्तः कालिदास मत्वा कालिदासस्य षष्ठशतकोद्भववत्वं स्वीकरोति।

४. वत्सभट्टिमहोदयस्यैकः शिलालेखः प्राप्यते, यत्र ५२९ मालवसंवत् विद्यते, स च ई० ४७३ तः संवदति। तस्य शिलालेखस्य भाषा कालिद भाषामनुहरति एतदेवाधारीकृत्य मैक्डोनलमहोदयः कालिदासस्य पञ्च कोद्भवतामाहुः।

५. डा० हार्नले-प्रभृतयस्तु विद्वांसः कालिदासस्य काव्येषु गोप्ता कुमार-गुप्त-स्कन्ध-प्रभृतिशब्दैः गुप्तवंश्यनृपाणां स्मरणं मन्यमानाः कालि समयं पञ्चमं षष्ठं वेशवीयशतकमाहुः।

६. ए० सी० चटर्जीमहोदयस्तु कालिदासं मालवनरेशयशोधर्मसमक मत्वा षष्ठशतकवर्त्तिनमाह।

७. रामचन्द्रविनायकपटवर्धनस्तु 'आषाढस्य प्रथमदिवसे', 'प्रत नभसि' इत्यादि पद्याधारेण ज्यौतिषानुसारिणीं गणनां कृत्वा १८०० वर्त्तिनं कालिदासमातिष्ठते।

८. आर० कृष्णमाचारियर-महाशयो मेघसन्देशविमर्शनामकग्रन्थे यत् 'दिङ्नागानां पथि परिहरन्' इति श्लोकस्य साक्ष्येण दिङ्नागसमक कालिदासः ई० षष्ठशतकेऽवर्त्ततेति।

९ म० म० रामावतारशर्मा महोदयः कालिदासं द्वितीयचन्द्रगुप्तसमक मत्वा ३७१ तः ४५० ई० मध्यवर्त्तिनं सप्रमाणं साधयति!

विचारकास्तु—प्राचीनसमये मालवनामकगणस्य प्रामुख्यमवर्त्तत पूर्वतृतीयशतके क्षुद्रकगणेन सह मिलित्वा मालवगणः सिकन्दरेण सह सहायकाभावात् परं पराजीयत। अयमेव मालवगणो ग्रीकाणां सतता पीडितः सन् राजस्थानमागत्य ई० प्रथमशतके मालवदेशं स्वायत्ती गणराज्येऽस्मिन् विक्रमादित्यो मुख्योऽवर्त्तत। शकान् पराजित्यायं पदवीमभजत्' एतत्प्रवर्तितसंवत्सरस्य गणनाम्ना मालवसंवत् नाम्ना प्रचलितः। अतः ई० पू० प्रथमशतके विक्रमादित्यस्य सत्तया तत्सभायां कालिदासस्य स एव समयः संभवति।

किञ्च—निश्चितः समयोऽश्वघोषस्य स हि कुषाणनरेशकनिष्कसमकालिकतया प्रथमशताब्दीस्थितः। तत्काव्ये कालिदासस्य काव्यमनुक्रियमाणं वीक्ष्यते। रघुवंशे कुमारे च विद्यमानं पद्यं बुद्धचरितेऽश्वघोषेण किञ्चिदेव विपर्यस्योपन्यस्तम्, अतोऽश्वघोषात्पूर्ववर्त्ती सम्भवति कालिदासः।

तदाभ्यां सम्भवप्रमाणाभ्यां कालिदासस्य ई० पूर्वप्रथमद्वितीयशतकसम्भवत्वं स्वीकर्त्तुं समर्थ्यन्ते।

## कालिदासस्य देशः

कालिदासस्य को देश इति विषये महान् मतभेदः। केचन काश्मीरान्, अपरे वङ्गान्, तदन्ये मिथिलां च तद्देशमाहुः। वयन्तु पश्यामः—मालवगणमुख्यविक्रमादित्यसभास्थस्य कालिदासस्य मालवमुख्यनगरी उज्जयिनी एव स्थानम्। कालिदासस्योज्जयिनीवर्णनपक्षपातोऽपि पक्षमिमं समर्थयते। कालिदासेन यथा सूक्ष्मेक्षिकयावन्तीनां भौगोलिकी स्थितिर्मेघदूते निबद्धा सा तद्देशवासित्वे एव सम्भवति। हिमालयादिवर्णनमपि वङ्गमिथिलादिवासिनः कालिदासस्य कृते न तथानुकूलं यथा मालववासिन इत्यपि पूर्वोक्तसमर्थकम्।

Scanned with CamScanner